X

CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 74

TRIPURASUNDARYAH
Title PRATAH KRTYA VIDHI.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 74 Subject: Tantric Ritual

Title: Tripurasundaryā Bhūta[illegible] vidhi

Author: — Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 8.5" by 3.4" Extent: 9 foll.

Language: Sanskrit Script: Devanagari

Remarks: incomplete - ends abruptly

श्री श्रीगणेशाय नमः अथ श्रीमत्त्रिपुरसुंदर्याः प्रातःकृत्यविधिर्लिख्यते॥ तत्र श्रीमा
न्साधकेंद्रो ब्राह्मे मुहूर्ते चोत्थायावश्यकं कृत्वा रात्रिवासस्त्यक्त्वा शुद्धे वाससी प
रिधायाचम्य मनसा शुचिर्भूत्वा शय्यायाम्मृद्वासने ब ह्रूप प्रासनेपोपविश्य च
गुरुपादुकामंत्रेण प्राणायामत्रयं कृत्वा॥ मंत्रो यथा हसख्फ्रें हसक्षमलव
रयूं सहख्फ्रें सहक्षमलवरयीं हंसः सोहं स्वाहा॥ इति मंत्रेण प्राणायामत्रयं कृ
त्वा॥ स्वशिरसि गुरुं ध्यायेद्यथा॥ अस्य श्रीगुरुपादुकामंत्रस्य ब्रह्मा ऋषिः। अ श्री:
व्यक्ता गायत्री छंदः श्रीगुरुपादुका देवता हसख्फ्रें हसक्षमलवरयूं बीजं॥ सह १
ख्फ्रें सहक्षमलवरयीं शक्तिः॥ हंसः सोहं स्वाहा॥ कीलकं मम सकलमनोरथसि

ध्यर्थे जपे वि०॥ ऋषिः शि० छं० मु० दे० हृ० बी० गु० शं० पा० कि० ल० सं० मं० त्रस्य भागत्रयं [redacted] द्विरा
वृत्त्या करषडंगं च हृदयादि षडंगानि न्यस्य ध्यायेच्छिरस्याधोमुखसहस्रदलक
मलकर्णिकांतरगतचंद्रमंडलांतस्थहंसपीठे निजगुरुं शुक्लवर्णं शुक्लालंकारभू
षितं द्विभुजं द्विनयनं वराभयकरं शांतं प्रसन्नमानसं वामोरुस्थलरक्तशक्तियुतं वा
मे घनतरक्तोत्पलाया दक्षहस्तेन धृतचारुकलेवरं दिव्याभिषेकेन गुरूणां संप्रदाया
नुगतनामपूर्वकं॥ सहस्रदलपुष्करे सकलशीतरश्मिप्रभं वराभयकरांबुजं विमलगं
धपुष्पांबरं॥ प्रसन्नवदनेक्षणं सकलदेवतारूपिणं स्मरेच्छिरसि हंसगं तदभिधान
पूर्वकं गुरुं इति ध्यात्वा मानसैरुपचारैरभ्यर्चयेद्यथा॥ [redacted] लं पृथिव्यात्मकं गंधं अनुक

नंदनाथगुरुअमुकशक्त्यंबाश्रीपादुकायैपरिकल्पयामिनमः॥ कनिष्ठि
कांगुष्ठाभ्यांदद्यात्॥ हं आकाशात्मकंपुष्पं० तर्जन्यंगुष्ठाभ्यांयंवायव्या
त्मकंधूपं०॥ तर्जन्यंगुष्ठाभ्यांरंवह्न्यात्मकंदीपं०॥ मध्यमांगुष्ठाभ्यांवंअमृता
त्मकंनैवेद्यं० अनामांगुष्ठाभ्यांसर्वात्मिकंफलतांबूलंसमर्पयामि॥ सर्वांगु
लिभिःपद्मस्यकर्णिकामध्येद्वादशांतेगुरुःशक्तितः॥ पदत्रयमनुस्मृत्यगुरु
स्मृतिपुरःसरं॥२॥ अकुलेरकंचमिश्रंचपद्मोपरिरहस्यवित्॥ चरणद्वयसंभू २
तौस्वेच्छाविग्रहधारिणौ॥ देवदेव्यौतथानाथास्वस्वमंत्रयुतौस्मरेत्॥ गुरुं
चगुरुपत्नीचदेवदेवीविकावयेत्॥ इतिध्यात्वापंचमुद्राभिःप्रणमेत्स्तंभनंच
तुरस्त्रंचमकः गोक्षुरमेवच॥ योनिमुद्रेतिविख्याताःपंचैतागुरुवंदने॥४॥
एभिर्मुद्राभिर्नत्वाप्रार्थयेत्तदनंतरं॥ अथमंत्रः ॐ ऐं क्रीं ह्स्रैं हसक्षमलवरयूं
हसक्षमलवरयरुं हसक्षमलवयरां ह्स्रौः श्रीपरापावकसर्वाराध्यसर्वेमूर्ध्वे
दुरनाथसर्वगुरुस्वयंगुरुश्रीगुरुनाथहसक्षमलवयरूं ह्स्रौं सहक्षमल
वेरींसहक्षमलवेरींसहक्षमलवयरुं सहक्षमलवयरां श्रीशंभुगुरुसहक्ष
मलवयरीं ह्स्रौं सहक्षमलवयरुं अमुकानंदनाथगुरुअमुकदेव्यंबाश्रीपादु

कां प्रज्ञ या मि नमः॥ इति पूर्णाभिषिक्तेन गुरुपादुकामंत्रं जपेत्॥ केवलाभिषि
क्तेन वाग्भवं यथाशक्ति प्रजप्य गुह्येति मंत्रेण गुरोः दक्षिण करे जपं समर्प्य
गुरुवंदनादि दिव्य मुद्राभिः गुरवे प्रणामं कुर्यात् अखंडेति अज्ञानेति २ न
मस्ते गुरवे तस्मै स्वेष्टदेवस्वरूपिणे॥ यस्य वागमृतं हंति विषं संसारसंज्ञकं॥
नमस्ते नाथ भगवन् शिवाय गुरुरूपिणे॥ विद्यावतारसंसिद्ध्यै स्वीकृतानेकवि
ग्रहः॥ नवाय नवरूपाय परमार्थैकरूपिणे॥ सर्वज्ञानतमोभेदभानवे चिद्घना ३
यके॥ स्वातंत्र्याय दयाक्लृप्तविग्रहाय शिवात्मने॥ परतंत्राय भक्तानां भव्यानां भ

व्यदायिने॥६॥ विवेकिनां विवेकाय विमर्शाय विमर्शिनां॥ प्रकाशानां प्रका
शाय ज्ञानिनां ज्ञानरूपिणे॥७॥ पुरस्तात् पार्श्वयोः पृष्ठे नमस्कुर्यादुपर्य
धः॥ सदा मच्चित्तरूपेण विधेहि भवदासनं॥८॥ त्वत्प्रसादादहं देव कृतकृ
या त्योस्मि सर्वतः॥ मा[illegible]मृत्यु महापाशाद्विमुक्तोस्मि शिवोस्मि च॥९॥ प्रातः
प्रभृति सायांतं सायादि प्रातरंततः॥ यत्करोमि जगन्नाथ तदस्तु तव पूजनं॥
इति सर्वकृत्यं गुरवे निवेद्य तदाज्ञां प्राप्य [illegible]॥ तस्मादस्वबलतामृतेन धार
याक्षालितमात्मानं निर्मलानंदमयं विभाव्य गुरुस्तोत्रेण स्तुत्वा रतिसर्वकृत्यं

गुरवे निवेद्य पंचमुद्राभिः प्रणमेत् इति गुरुचिंतनं॥ अथ कुंडलिनीध्यानं॥ प्रथमं
मूलाधारे वः इति वर्णयुक्तं चतुर्दलं पंकजं सकेसरं पीतवर्णं ध्यात्वा तत्कर्णिकां
तर्गत अकथादि त्रिरेखाढ्यं सोमसूर्याग्निमयं त्रिकोणं विभाव्य तन्मध्ये कुं
जपाकुसुमसन्निभं सूर्यकोटिप्रतीकाशं चंद्रकोटिसुशीतलं सत्वरजस्तमोगु
णाक्रांतं कामबीजाख्यं बिंदुं विचिंत्य तत्राधोमुखस्वयंभूलिंगवेष्टिनीं विश्वस्य
सृष्टिस्थितिलयात्मिकां कुंडलिनीं शक्तिं चिद्रूपां षट्त्रिंशत्कलायुक्तां पंचाश ४
द्वर्णविग्रहीं श्रीमत्त्रिपुरसुंदरीस्वरूपिणीं प्रसुप्तभुजगाकारां शंखावर्त्ताकारेण

सार्द्धत्रिवलयां मृणालतंतुनिभां चंद्रकोटिसुशीतलां स्फुरद्दीपशिखाकृतिं बिंदुना
दशशक्तिस्वरूपिणीं च कोटिविद्युत्तेजपुंजनिभां कुंडलिनीं ध्यात्वा कूर्चबीजेन हं
समंत्रप्रणवेन वाग्निशिखा योगात् त्संचेतनां विधाय गुरूपदिष्टविधिना सुषुम्ना
मार्गेण मूलाधारस्वाधिष्ठानमणिपूरकानाहतविशुद्ध्याज्ञाख्यानि षड्चक्राणि क्र
मेण मनसा भित्वा सुषुम्नामार्गेण सहस्रदलकमले बिंदुस्थाने परमसदाशिवे संयो
ऽपा तयोः सामरस्यानंदमयं विचिंत्य तत्रस्थचंद्रमंडलाद्विगलितामृतं मनसा पात्रे
णतां पाययित्वा॥ षट्चक्रस्थडाकिन्यादिशक्तीनामपि तेनामृतेन संतोष्य पुनः परार

तासु धास्रोतःस्वरूपिणी अकुलामृतसुषुम्णांतर्गततत्तदाधारत्तत्तधातुतत्त
दूर्णतत्तदधिदैवतां प्लावयंतं मात्रा विशुद्धानाहतमणिपूरक स्वाधिष्ठानमूला
धारइति क्रमेणमंत्री भूतां कुंडलिनीं मूलाधारेसमानीयस्थापयेत्॥ इतिकुं
डलीनीविषयं॥ अथमंत्रध्यानं तत्रादौकूटत्रयंध्यायेत्॥ यथा मूलाधा
शक रेवह्निमंडलदशकलात्मकं विभाव्यतत्रवाग्भवकूटस्फुरत्तडिल्लताभासं अनाह
तपर्यंतंप्राप्तनादशिखांध्यात्वा॥ अनाहतेसूर्यमंडलद्वादशकलात्मकंध्यात्वा ५
तन्मध्येकामराजकूटस्फुरद्द्वादशबालार्कवर्णं वाग्भवनादशिखालग्नंमाज्ञापर्यं

तंप्राप्तनाद। शिखांध्यात्वा आज्ञायांसोममंडलंषोडशकलात्मकंध्यात्वातन्म
ध्येशक्तिकूट शशिप्रभंकामराजशिखालग्नंब्रह्मरंध्रांतंबिंदुमंडलांतःपर्याप्त
नादशिखांता दमृतधारयापरिप्लुतंभावयेत्॥ इतिबीजध्यानं अथपूर्णवि
द्याध्यानं मूलाधारब्रह्मरंध्रांतंतेजोदंडमयंमूलमंत्रंविभाव्यतत्तेजसाव्याप्तदे
हंभावयेदितिमंत्रचिंतनं॥ अथदेविचिंतनं ततःप्राणायामत्रयंकृत्वाऋष्या
दिकरषडंगविधिं॥ अकामकलारूपमात्मानंध्यात्वाहृदयेवक्ष्यमाणप्रकारेण
देवींध्यात्वामानसैः संपूज्यमूलविद्यामष्टोत्तरशतंजपित्वा अंगविद्यामपिदशां

शजपित्वा गुह्येत्य ।। दिनादेवी वामकरे जपं समर्प्य चक्रदेवताविद्यागुर्वात्मना ।
मभिन्नशरीरं विभावयेत् ब्रह्मैवास्मीति मत्वा गुरुं प्रणम्य प्रातस्तोत्रं पठेत् ।।
प्रातर्नमामि जगतां जनन्याश्चरणांबुजं श्रीमत्त्रिपुरसुंदर्या नमिताया हरादि
भिः ।। प्रातस्त्रिपुरसुंदर्यास्तान् नमामि पादपंकजं ।। हरिर्हरो विरंचिश्च सृष्ट्यादिन्
कुरुते यथा ।। प्रातस्त्रिपुरसुंदर्याः नमामि चरणांबुजं ।। यत्पादमंबु शिरसा भाति
गंगा महेशितुः ।। प्रातः पाशांकुशशरचापहस्तां नमाम्यहं ।। उद्यदादिसंकाशां त्य
श्रीमत्त्रिपुरसुंदरीं ।। प्रातर्नमामि पादाब्जं ययेदं भासते जगत् ।। तस्यास्त्रिपु

रसुंदर्या यत्प्रसादान्निवर्तते ।। यः श्लोकपंचकमिदं प्रातर्नित्यं पठेन्नरः ।।
तस्मै दद्यादात्मपदं श्रीमत्त्रिपुरसुंदरी ।। इति पंचभिः श्लोकैः स्तुत्वा नत्वा
देव्याज्ञां प्रार्थयेत् ।। त्रैलोक्यचैतन्यमयेश्वरी श्रीसुंदरी त्वच्चरणाज्ञयैव ।।
प्रातः समुत्थाय तव प्रियार्थं संसारयात्रामनुवर्तयिष्ये ।। १ ।। संसारया
त्रामनुवर्तमानं त्वदाज्ञया श्रीत्रिपुरे परेशी ।। स्पर्द्धा तिरस्कार कलिप्र
मादभयानि मां प्रभुवंतु मातः ।। इति संप्रार्थ्य ।। अहं देवी न चान्योस्मि
ब्रह्मैवाहं न शोकभाक् ।। सच्चिदानंदरूपोहमात्मानमिति चिंतयेत् ।। २

गुरुदेवतात्मानमैक्यं विभाव्य प्रणयेत् इति देवचिंतनं ॥ अथास्मिन्न समये रा
त्रिश्चेदजपानिवेदनं कुर्यात् यथा अद्येत्यादि अमुकसंवत्सरे मासे पक्षे धु
तिथौ मया पूर्वदिने सूर्योदयमारभ्याहोरात्रेण श्वासोच्छ्वासात्मकसि[illegible]त
षट्शताधिकमेकविंशतिसहस्रसंख्याकमजपाजपं मूलाधारस्वाधिष्ठा
नमणिपूरकअनाहतविशुद्धआज्ञाब्रह्मरंध्रेषु वादिसांतवर्णैर्युक्तं वा 6
दिलांतवर्णैः डादिफांतवर्णैः कादिठांतवर्णैः अकारादिषोडशस्वरैर्युक्तं
हंक्षाभ्यां युक्तं अनंतवर्णैर्युक्तं चतुर्दल षट्दल दशदल द्वादशदल षोडश

शक्तिसहितस्थिताय विष्णवे षट्सहस्र अनाहते कादिठांतवर्णै० द्वादशदल
पद्मे संहारशक्तिसहितस्थिताय रुद्राय षट्सहस्र विशुद्धे अकारादिषोडशस्व
रैर्युक्तषोडशपद्मे प्राणशक्तिसहितस्थिताय जीवात्मने सहस्रं स० आज्ञे हंक्षा
भ्यां युक्त द्विदलपद्मे ज्ञानशक्तिसहितस्थिताय परमात्मने सहस्रं स० सहस्रा
रे अनंतवर्णैर्युक्ते सहस्रपद्म अनंतशक्तिसहितस्थिताय गुरुपादुकायै सहस्रं
स० अद्यदिने सूर्योदयमारभ्य अहोरात्रेण श्वासोच्छ्वासात्मकं षट्शताधिकमे
कविंशतिसहस्रसंख्याकं मजपाजपमहं करिष्ये ॥ इति संकल्प्य हंसइति मंत्रेण

प्राणायामत्रयंकृत्वा ॥ अस्यअजपामंत्रस्यहंसऋषिः अव्यक्तछंदः परमहंसो
देवताहंबीजंसःशक्तिः सोहंकीलकं ॥ ममसकलमनोरथसिद्ध्यर्थे ॰ अज
पाजपंकरिष्ये हंसऋषये ॰ शिरसि अव्यक्तागायत्रीछंदः मुखे परमहंसदेव
तायनमो हृदि ॥ हंबीजा ॰ गु ॰ सः शक्तयेनमः पादयोः सोहंकीलकायनमः ॥
सर्वांगेइतिऋष्यादिः ॥ अथकरषडंगः ह्रां सूर्यात्मनेनमस्वाहा अंगुष्ठा
भ्यांनमः ह्रीं सोमात्मनेस्वाहा तर्जनीभ्यां ॰ ह्रूं निरंजनात्मनेस्वाहा मध्यमा ॰ ९
ह्रैं निराभासात्मनेस्वाहा अनामि ॰ ॥ ह्रौं अतनुसूक्ष्मप्रचोदयात्मनेस्वाहा

दलद्विदलसहस्रदलेषुस्थितेभ्यो इच्छाशक्तिसहित क्रियाशक्ति ॰ रतिशक्ति ॰
संहारशक्ति ॰ इच्छा प्राणशक्ति ॰ ज्ञानशक्ति ॰ अनंतशक्ति ॰ गणपति ॰ ब्रह्मा
विष्णुरुद्रजीवात्मापरमात्माश्रीगुरुपादुकाभ्योयथाविभागशः समर्प
यिष्यामिइतिसंकल्प्य तन्मध्यान्मूलाधारे वादिसांतवर्णैर्युक्त चतुर्दलप
द्मेइच्छाशक्तिसहितस्थितायगणपतयेषट्शतंसमर्पयामिनमः ॥ स्वाधिष्ठा
नेवादिलांतवर्णैर्युक्त षड्दलपद्मे क्रियाशक्तिसहितस्थितायब्रह्मणेष ८
ट्सहस्रंसमर्पयामिनमः ॥ मणिपूरके डादिफांतवर्णैर्युक्त दशदलपद्मेरति